तस्मान्न वाच्यो ह्येकेन बहुज्ञेनापि संशयः ।
तस्मान्न हिंसा यज्ञस्य यदुक्तमृषिभिः पुरा ॥"
इति मात्स्ये ११६ अध्यायः ॥

तद्वैदिकपर्य्यायः । वेनः २ अध्वरः ३ मेधः ४ विदथः ५ नार्य्यः ६ सवनम् ७ होत्रा ८ इष्टिः ९ देवताता १० मखः ११ विष्णुः १२ इन्दुः १३ प्रजापतिः १४ धर्म्मः १५ । इति पञ्चदश यज्ञनामानि । इति वेदनिघण्टौ । ३ । १७ ॥ ( विष्णुः । यथा, महाभारते ।१३।१४९।११७।
"यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः ॥")

यज्ञकृत्, त्रि, ( यज्ञं करोतीति । कृ + क्विप् । ) यागकर्त्ता । ( यथा, श्रीमद्भागवते ।४।४।७।
"तामागतां तत्र न कश्चनाद्रियद्-
विमानितां यज्ञकृतो भयाज्जनः ।
ऋते स्वसॄर्वै जननीञ्च सादराः
प्रेमाश्रुकण्ठ्यः परिषस्वजुर्मुदा ॥"
पुं, विष्णुः । यथा, महाभारते । १३ । १४९ । ११८ ।
"यज्ञभृद्यज्ञकृद्यज्ञी यज्ञभुग् यज्ञसाधनः ॥")

यज्ञपशुः, पुं, ( यज्ञार्थः पशुः । ) घोटकः । इति शब्दमाला ॥ ( यथा, श्रीमद्भागवते । ४ । १९ । ११ ।
"चरमेणाश्वमेधेन यजमाने यजुष्पतिम् ।
वैन्ये यज्ञपशुं स्पर्द्धन्नपोवाह तिरोहितः ॥")
छागश्च ॥

यज्ञपुरुषः, पुं, (यज्ञरूपी पुरुषः ।) विष्णुः । इति हेमचन्द्रः । २ । १३ ॥ ( यथा, श्रीमद्भागवते । २ । ७ । ११ ।
"सत्रे ममास भगवान् हयशीरषाथो
साक्षात् स यज्ञपुरुषस्तपनीयवर्णः ।
छन्दोमयो मखमयोऽखिलदेवतात्मा
वाचो बभूवुरुशतीः श्वसतोऽस्य नस्तः ॥")

यज्ञभाजनं, क्ली, ( यज्ञस्य भाजनम् । ) यज्ञपात्रम् । इति जटाधरः ॥

यज्ञभूषणः, पुं, (यज्ञं भूषयतीति । भूष + णिच् + ल्युः ।) श्वेतदर्भः । इति राजनिर्घण्टः ॥ (कुशमात्रम् । यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ।
"कुशो दर्भस्तथा बर्हिः सूच्यग्रो यज्ञभूषणः ।
ततोऽन्यो दीर्घपत्रः स्यात् क्षुरपत्रस्तथैव च ॥")

यज्ञयोग्यः, पुं, ( यज्ञे योग्यः उचितः । ) उडुम्बरवृक्षः । इति राजनिर्घण्टः ॥ यागार्हे, त्रि ॥

यज्ञवल्ली, स्त्री, ( यज्ञस्य वल्ली । ) सोमवल्ली । इति राजनिर्घण्टः ॥ ( गुणादयोऽस्याः सोमलताशब्दे ज्ञातव्याः ॥ )

यज्ञवाटः, पुं, (यज्ञस्य वाटो गृहम् ।) यज्ञस्थानम् । इति हेमचन्द्रः ॥ ( यथा, श्रीमद्भागवते । १० । २३ । ३३ ।
"इत्युक्ता मुनिपत्न्यस्ता यज्ञवाटं पुनर्गताः ।
ते चानसूयवः स्वाभिः स्त्रीभिः सत्रमपारयन् ॥")

यज्ञवृक्षः, पुं, ( यज्ञस्य वृक्षः ।) वटीवृक्षः । इति राजनिर्घण्टः ॥ (विकङ्कतः । तत्पर्य्यायो यथा,
"विकङ्कतः स्रुवावृक्षो ग्रन्थिलः स्वादुकण्टकः ।
स एव यज्ञवृक्षश्च कण्टकी व्याघ्रपादपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

यज्ञश्रेष्ठा, स्त्री, ( यज्ञे श्रेष्ठा । ) सोमवल्ली । इति राजनिर्घण्टः ॥

यज्ञसाधनः, पुं, ( यज्ञं साधयतीति । सिध + णिच् + ल्युः । ) विष्णुः । इति महाभारते तस्य सहस्रनामस्तोत्रम् । १३ । १४९ । ११८ ॥ (यज्ञसाधके, त्रि । यथा, ऋग्वेदे । १।१४५।३।
"पुरुप्रैषस्ततुरिर्यज्ञसाधनः ।"
"यज्ञसाधनः यज्ञसाधकः अस्मदधीनत्वात् यज्ञस्य ।"
इति तद्भाष्ये सायणः ॥)

यज्ञसारः, पुं, (यज्ञे सारः उत्कृष्टः ।) यज्ञोडुम्बरवृक्षः । इति राजनिर्घण्टः ॥

यज्ञसूत्रं, क्ली, (यज्ञे धृतं सूत्रम् ।) यज्ञोपवीतम् । यथा,—
"पवित्रं यज्ञसूत्रञ्च यज्ञोपवीतमित्यपि ।
यज्ञसूत्रं तदेवोपवीतं स्याद्दक्षिणे भुजे ।
उद्धृते वामबाहौ तु प्राचीनावीतमप्यदः ।
निवीतन्तु तदेव स्यादूर्द्धवक्षसि लम्बितम् ॥"
इति जटाधरः ॥
तस्य प्रमाणं यथा,—
"ऊर्द्धन्तु त्रिवृतं सूत्रं सधवानिर्म्मितं शनैः ।
तन्तुत्रयमधोवृत्तं यज्ञसूत्रं विदुर्बुधाः ॥
त्रिगुणं तद्ग्रन्थियुक्तं वेदप्रवरसम्मितम् ।
शिरोधरान्नाभिमध्यात् पृष्ठार्द्धपरिमाणकम् ॥
यजुर्व्विदां नाभिमितं सामगानामयं विधिः ।
वामस्कन्धेन विधृतं यज्ञसूत्रं बलप्रदम् ॥"
इति कालिकापुराणे ४ अध्यायः ॥
अस्य धारणे मन्त्रो यथा,—
"यज्ञोपवीतमसि यज्ञस्य त्वोपवीतेनोपनह्यामि ।"
इति संस्कारतत्त्वधृतभट्टभाष्यम् ॥
यजुषान्तु,—
"यज्ञोपवीतं परमं पवित्रं
बृहस्पतेर्यत् सहजं पुरस्तात् ।
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं
यज्ञोपवीतं बलमस्तु तेजः ॥"
इति पशुपतिः ॥
युगभेदे तत्सूत्रनियमो यथा,—
"सत्ये स्वर्णमयं सूत्रं त्रेतायां राजतं तथा ।
द्वापरे ताम्रजं प्रोक्तं कलौ कार्पाससम्भवम् ॥"
इति बृहद्राजमार्त्तण्डः ॥
अन्यच्च ।
"यज्ञार्थं धार्य्यते सूत्रं यज्ञं ब्रह्मण्यमिष्यते ।
स्वर्णं रौप्यं ताम्रमयं पट्टं कार्पासवार्हिषम् ॥
मृगाजिनं गुटं शष्ठी यथालब्धं निधाय च ।
यज्ञसूत्रं परिचरेद्ब्रह्मलिङ्गक्रियात्मकम् ॥
न तत्र नियमो ग्राह्यः सूत्रब्रह्मण्यशङ्कया ॥"
इति वृद्धादित्यसंहिता ॥

यज्ञस्थानं, क्ली, ( यज्ञस्य स्थानम् । ) यज्ञवाटः । इति जटाधरः ॥

यज्ञाङ्गः, पुं, ( यज्ञं अङ्गति प्राप्नोतीति । अङ्ग + अच् । ) उडुम्बरः । इत्यमरः । २ । ४ । २२ ॥ (अस्य पर्य्यायो यथा,—
"यज्ञाङ्गो ब्रह्मवृक्षश्च हेमदुग्धोऽप्युडुम्बरः ॥"
इति वैद्यकरत्नमालायाम् ॥
"उडुम्बरो जन्तुफलो यज्ञाङ्गो हेमदुग्धकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
खदिरवृक्षः । इति राजनिर्घण्टः ॥ ब्राह्मणयष्टिका । इति शब्दचन्द्रिका ॥ (यज्ञ एव अङ्गं यस्य । विष्णुः । यथा, महाभारते ।१३।१४९।११७।
"भूर्भुवःस्वस्तरुस्तारः सविता प्रपितामहः ।
यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः ॥"*॥
यज्ञस्याङ्गमिति । ) यागावयवे यज्ञसाधने च क्ली ॥ ( यथा, कुमारसम्भवे । १ । १७ ।
"यज्ञाङ्गयोनित्वमवेक्ष्य यस्य
सारं धरित्रीधरणक्षमञ्च ॥")

यज्ञाङ्गा, स्त्री, (यज्ञमङ्गति प्राप्नोति या । अङ्ग + अच् । टाप् ।) सोमवल्ली । इति राजनिर्घण्टः ॥ ( विषयोऽस्याः सोमवल्लीशब्दे ज्ञातव्यः ॥ )

यज्ञान्तः, पुं, ( यज्ञस्य अन्तोऽवसानं यस्मिन् । ) अवभृथः । इति हेमचन्द्रः । ३ । ४९८ ॥ यागशेषश्च ॥ ( यथा, महाभारते । १३ । १४९ । ११८ ।
"यज्ञान्तकृत् यज्ञगुह्यमन्नमन्नाद एव च ॥")

यज्ञारिः, पुं, (यज्ञस्य दक्षयज्ञस्य अरिर्नाशकः ।) शिवः । इति धनञ्जयः ॥ रावणश्च ॥

यज्ञिकः, पुं, पलाशवृक्षः । इति जटाधरः ॥ ( अनुकम्पितो यज्ञदत्तः । "बह्वचो मनुष्यनाम्नष्ठच् वा ।" ५ । ३ । ७८ । इति ठच् । "ठाजादावूर्द्धं द्वितीयादचः ।" ५।३।८३। इति प्रकृतेर्द्वितीयादच ऊर्द्धस्य लोपः । यज्ञदत्तकः । इति काशिका ॥ )

यज्ञियं, त्रि, (यज्ञमर्हतीति । यज्ञ + "यज्ञर्त्विग्भ्यां घखञौ ।" ५।१।७१। इति घः । ) यज्ञकर्म्मार्हम् । इत्यमरः । २।७।२७ ॥ (यथा, हरिवंशे । २९ । १६ ।
"हृतो यज्ञविभागो हि यज्ञियैर्हि सुरैः पुरा ॥")
यज्ञाय हितम् । इति मुग्धबोधव्याकरणम् ॥ (यथा, मनुः । २ । २३ ।
"कृष्णसारस्तु चरति मृगो यत्र स्वभावतः ।
स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्ततः परः ॥")

यज्ञियः, पुं, (यज्ञाय हितः । यज्ञ + घः ।) द्वापरयुगम् । इति त्रिकाण्डशेषः ॥ ( खदिरवृक्षः । तत्पर्य्यायो यथा,—
"खदिरो रक्तसारश्च गायत्री दन्तधावनः ।
कण्टकी बालपत्रश्च बहुशल्यश्च यज्ञियः ॥"
इति भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ॥
पलाशः । तत्पर्य्यायो यथा,—
"पलाशः किंशुकः पर्णो यज्ञियो रक्तपुष्पकः ।
क्षारश्रेष्ठो वातहरो ब्रह्मवृक्षः समिद्वरः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)